# Shri Medhadakshinamurti Mant‘ravarnapada Stuti

# શ્રીમેધાદક્ષિણામૂર્તિમન્ત્રવર્ણપદસ્તુતિઃ

## Document Information

Text title : Shri Medhadakshinamurti Mantravarnapada Stuti

File name : medhAdakShiNAmUrtimantravarNapadastutiH.itx

Category : shiva, mantra, stuti

Location : doc_shiva

Proofread by : Narendran Madathil

Latest update : July 20, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 21, 2026

*sanskritdocuments.org*

Shri Medhadakshinamurti Mant‘ravarnapada Stuti

# શ્રીમેધાદક્ષિણામૂર્તિમન્ત્રવર્ણપદસ્તુતિઃ

ૐ નમો ભગવતે દક્ષિણામૂર્તયે મહ્યં મેધાં પ્રજ્ઞાં પ્રયચ્છ સ્વાહા ।
ઓમિત્યેકાક્ષરં બ્રહ્મ વ્યાહરન્તિ ત્રયશ્શિખાઃ ।
તસ્મૈ તારાત્મને મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૧॥

નત્વાયં મુનયસ્સર્વે પરં યાન્તિ દુરાસદમ્ ।
નકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૨॥

મોહજાલવિનિર્મુક્તો બ્રહ્મવિદ્ યાતિ યત્પદમ્ ।
મોકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૩॥

ભવમાશ્રિત્ય યં વિદ્વાન્ ભવે નહ્યભવત્ પુનઃ ।
ભકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૪॥

ગગનાકારવદ્ભાન્તમનુભાત્યખિલં જગત્ ।
ગકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૫॥

વટમૂલનિવાસો યો ગુરૂણાં ગુરુરવ્યયઃ ।
વકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૬॥

તેજોભિર્યસ્ય સૂર્યોઽસૌ કાલકૢપ્તિકરો ભવેત્ ।
તેકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૭॥

દક્ષત્રિપુર કામારિઃ યઃ કાલવિષભઞ્જકઃ ।
દકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૮॥

ક્ષિપ્રં ભવતિ વાક્સિદ્ધિઃ યન્નામસ્મરણાન્નૃણામ્ ।
ક્ષિકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૯॥

ણાકારવાચ્યો વસ્સુમં સન્દીપયતિ મે મનઃ ।
ણાકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૧૦॥

મૂર્તયોહ્યષ્ટધા યસ્ય જગજ્જન્માદિકારણમ્ ।

મૂકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૧૧॥

તત્ત્વમસીતિવાક્યેન ગુરૂણા યત્પ્રબોધિતઃ ।
તકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૧૨॥

યેયં વિદિત્વા બ્રહ્માદ્યા ઋષયો યાન્તિ નિર્વૃતિમ્ ।
યેકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૧૩॥

મહામૌની કરે માલાં મુદ્રાં સંવિન્મયીં દધન્ ।
મકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૧૪॥

હ્યમ્બિકામુખપદ્માર્કો હેયોપાદેયવર્જિતઃ ।
હ્યકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૧૫॥

મેધાપ્રદાનદક્ષાય મેરુકોદણ્ડપાણયે ।
મેકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૧૬॥

ધામત્રયાત્મનેત્રાઢ્ય ધૂર્જટે ધવલ પ્રભ ।
ધાકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૧૭॥

પ્રકૃતેર્યત્પરં ધ્યાત્વા તાદાત્મ્યં યાતિ વૈ મુનિઃ ।
પ્રકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૧૮॥

જ્ઞાનિનોયમુપાસ્યન્તિ તત્ત્વાતીતં ચિદાત્મકમ્ ।
જ્ઞાકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૧૯॥

પ્રજ્ઞા સઞ્જાયતે યસ્ય ધ્યાનનામાર્ચનાદિભિઃ ।
પ્રકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૨૦॥

યસ્ય સ્મરણમાત્રેણ નરોમુચ્યેત બન્ધનાત્ ।
યકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૨૧॥

છન્ના યસ્યા છવિર્મેધે સૂર્યવન્માયયા વિભોઃ ।
છકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૨૨॥

સ્વાન્તેવિદાં જડાનાં યો દૂરે તિષ્ઠતિ ચિન્મયઃ ।
સ્વાકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૨૩॥

હાર્દાકાશવિલાસાય હાટકાભશરીરિણે ।
હાકારરૂપિણે મેધાદક્ષિણામૂર્તયે નમઃ ॥ ૨૪॥

ઇતિ શ્રીમેધાદક્ષિણામૂર્તિમન્ત્રવર્ણપદસ્તુતિઃ સમ્પૂર્ણા ।

Proofread by Narendran Madathil

*Shri Medhadakshinamurti Mant‘ravarnapada Stuti*

pdf was typeset on July 21, 2026

Please send corrections to *sanskrit@cheerful.com*